# वाडमनःप्राणस्वरूपम्: प्रश्न उत्तर

अभ्यासः

प्रश्न 1.
अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत

(क) श्वेतकेतुः सर्वप्रथमम् आरुणिं कस्य स्वरूपस्य विषये पृच्छति?
उत्तरः
श्वेतकेतुः सर्वप्रथमम् आरुणिं मनसः स्वरूपस्य विषये पृच्छति।

(ख) आरुणिः प्राणस्वरूपं कथं निरूपयति।
उत्तरः
आरुणिः प्राणस्वरूपविषये कथयति 'पीतानाम् अपां योऽणिष्ठः स प्राणः इति।

(ग) मानवानां चेतांसि कीदृशानि भवन्ति?
उत्तरः
यादृशमन्नादिकं गृह्णाति मानवस्तादृशमेव तस्य चित्तादिकं भवतीति।

(घ) सर्पिः किं भवति?
उत्तरः
मथ्यमानस्य दध्नः योऽणिमा स ऊर्ध्वः समुदीषति, तत्सर्पिः भवति।

(ङ) आरुणेः मतानुसारं मनः कीदृशं भवति?
उत्तरः
आरुणेः मतानुसारं मनः अन्नमयं भवति।

प्रश्न 2.
(क) 'अ' स्तम्भस्य पदानि 'ब' स्तम्भेन दत्तैः पदैः सह यथयोग्यं योजयत-

'अ' स्तम्भः – 'ब' स्तम्भः
(क) मनः – (1) अन्नमयम्
(ख) प्राणः – (2) तेजोमयी
(ग) वाक् – (3) आपोमयः
उत्तरः
'अ' स्तम्भः – 'ब' स्तम्भः
(क) मनः – (1) अन्नमयम्
(ख) प्राणः – (3) आपोमयः
(ग) वाक् – (2) तेजोमयी

(ख) अधोलिखितानां पदानां विलोमपदं पाठात् चित्वा लिखत
उत्तरः
(i) गरिष्ठः = अणिष्ठः
(ii) अधः = उर्ध्वम्
(iii) एकवारम् = भूयः
(iv) अनवधीतम् = अवधीतम्
(v) किञ्चित् = सर्वम्

प्रश्न 3.
उदाहरणमनुसृत्यस निम्नलिखितेषु क्रियापदेषु 'तुमुन्' प्रत्ययं योजयित्वा पटनिर्माणं कुरुत
यथा-
प्रच्छ् + तुमुन् = प्रष्टुम्
उत्तरः
(क) श्रु + तुमुन् = श्रोतुम्।
(ख) वन्द् + तुमुन् = वन्दितुम्।
(ग) पठ् + तुमुन् = पठितुम्।
(घ) कृ + तुमुन् = कर्तुम्।।
(ङ) वि + ज्ञा + तुमुन् = विज्ञातुम्।
(च) वि + आ + ख्या + तुमुन् = व्याख्यातुम्।

प्रश्न 4.
निर्देशानुसारं रिक्तस्थानानि पूरयत
उत्तरः
(क) अहं किञ्चित् प्रष्टुम् इच्छामि। (इच्छ्-लट् लकारे)
(ख) मनः अन्नमयं भवति। (भू-लट् लकारे)
(ग) सावधानं श्रृणु। (श्रृ-लोट् लकारे)
(घ) तेजास्विनावधीतम् अस्तु। (अस्-लोट् लकारे)
(ङ) श्वेतकेतुः आरुणेः शिष्यः आसीत्। (अस्-लङ् लकारे)

प्रश्न 5.
उदाहरणमनुसृत्य वाक्यानि रचयत। यथा-अहं स्वदेशं सेवितुम् इच्छामि।
उत्तरः
(क) अहं शिष्यम् उपदिशामि।
(ख) अहं गुरुं प्रणमामि।
(ग) अहं शिष्यं पुस्तकम् आनेतुम आज्ञापयामि।
(घ) अहं गुरुं प्रश्नं पृच्छामि।
(ङ) अहं भवतः सङ्केतम् अवगच्छामि।

प्रश्न 6.
(क) सन्धिं कुरुत
उत्तरः
(i) अशितस्य + अन्नस्य = अशितस्यान्नस्य।
(ii) इति + अपि + अवधार्यम् = इत्यप्यवधार्यम्।
(iii) का + इयम् = केयम्।
(iv) नौ + अधीतम् = नावधीतम्।
(v) भवति + इति = भवतीति।

(ख) स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत
(i) मध्यमानस्य दध्नः अणिमा ऊर्ध्वं समुदीति।
उत्तरः
कस्य दधनः अणिमा ऊर्ध्वं समुदीषति?

(ii) भवता घृतोत्पत्तिरहस्यं व्याख्यातम्।
उत्तरः
केन घृतोत्पत्तिरहस्यं व्याख्यातम्?

(iii) आरुणिम् उपगम्य श्वेतकेतुः अभिवादयति।
उत्तरः
आरुणिम् उपगम्य कः अभिवादयति?

(iv) श्वेतकेतुः वाग्विषये पृच्छति।
उत्तरः
श्वेतकेतुः कस्यविषये पृच्छति?

प्रश्न 7.
पाठस्य सारांशं पञ्चवाक्यैः लिखत।
उत्तरः
पाठस्य सारांशः
अन्नमयं मनः भवति। आपोमयः प्राणः भवति एवं जलमेव जीवनं भवति। तेजोमयी वाक् भवति। अश्यमानस्य तेजसः यः अणिमा, स ऊर्ध्वः समुदीषति, सा खलु वाग्भवति। यादृशमन्नादिकं मानवः गृणाति तादृशमेव तस्य चित्तादिकं भवति।